पञ्चदशः पाठः

# सुखदो मध्यप्रदेशः

भारतस्य हृदयभूतस्य मध्यप्रदेशस्य स्पन्दनविषये को न जानाति। तथाविधस्य मध्यप्रदेशस्य इतिहासं, भौगोलिकविचारं, साहित्यसमृद्धिं, धार्मिकस्थानानि स्मारं स्मारं मोमुदीति मनः।

मध्यप्रदेशविषयकं प्रस्तुतं गीतं डॉ. रुद्रदेवत्रिपाठिवर्येण विरचितम्। एतेन गेयगीतेन छात्राः प्रदेशस्य इतिहासं वैशिष्ट्यञ्च ज्ञास्यन्ति।

जयति जयति भुवि भारतमध्ये, सुखदो मध्यप्रदेशः,
तरुवर-राजि-विराजित-कुसुमित-शोभित-सुन्दरवेशः।
॥जयति॥

सुजल-सुफल-शुभ-सस्यभूषितं विमलं यत्परिधानम्,
भारतभूरपि कुरुते नितरां येन मनस्यभिमानम्,
गायति सततं त्रिदशकुलं यन्मङ्गलमयशुभगानम्,
पाणिच्छायं लब्ध्वा यस्य च भवति जनो निःक्लेशः ॥1॥
॥जयति॥

महाकाल-परिभूषित-गेहा लसत्यवन्ती प्रीता
कलकलनादैः सिप्रा यस्यां प्रवहति पुण्य-परीता
कालिदास-बाणादिक-कविभिर्गाथा यस्या गीता
नन्दनन्दनेनापि च यस्यां सकला विद्याऽधीता,
प्रजाः पालयामास विक्रमः सुतमिव यत्र जनेशः ॥2॥
॥जयति॥

कौशल-विन्ध्य-जबलपुर-सागर-गोपाचल भूपालैः
इन्द्रपुरी-सम-विविध-वैभवैर्नगरैश्चापि विशालैः,
खनिज-धातु-कानन परिमण्डित सरितां कलकलनादैः,
चिरं चारु चर्या-चटुलोऽयं श्यामलसस्यरसालैः,
क्षणे-क्षणे यन्नवतां गृह्णानो विभाति सविशेषः ॥3॥
॥जयति॥

विदिशा-माहिष्मती-विशाला-धारा-दशपुर-ग्रामैः,
यशोधर्म-विक्रमादित्य-भोजादि-नृपैरभिरामैः
श्री भारवि-भवभूति-महेश्वर-कविवर्यैः सुललामैः
खचितोऽभूद् यस्य क्रोडः कुशलैरप्यनिशमवामैः
स्मारं स्मारमनीषां चरितं भवति महानुन्मेषः ॥4॥

॥जयति॥

सुरवर-किन्नर-यक्ष-सुसिद्धैर्वन्दित चरणो जयतात्,
नृपवर-कविवर-जनवृन्दैरभिनन्दित-चरणो जयतात्,
भारत-मातुर्मानसकमलं वैश्राव-धरणो जयतात्,
अन्न-वस्त्र-परिपीडित मनुजैराश्रित-शरणो जयतात्,
गायतु नित्यं प्रमुदितलोको जयतान्मध्य-प्रदेशः ॥5॥

॥जयति॥

## शब्दार्थः

| | | |
|---|---|---|
| परिधानम् | – | वस्त्रम् (वस्त्र) |
| सततम् | – | निरन्तरम् (लगातार) |
| त्रिदशकुलम् | – | देववंशः (देवताओं का वंश) |
| पाणिच्छायम् | – | हस्तच्छाया (हाथों की छाया) |
| गेहा | – | गृहाणि (घर) |
| नन्दनन्दनः | – | श्रीकृष्णः |
| पालयमास | – | पालितः (पालन किया) |
| लसति | – | सुशोभते (सुशोभित होती है) |
| अवन्ती | – | उज्जयिनी (उज्जैन नगरी) |
| जनेशः | – | नृपः (राजा) |
| गोपाचलम् | – | गालवनगरम् (ग्वालियर नगर) |
| चटुलः | – | चपलः (चञ्चल) |

| | | |
|---|---|---|
| विभाति | – | सुशोभते (सुशोभित होता है) |
| सुललामैः | – | सुशोभनैः (सुशोभितों द्वारा) |
| खचितः | – | जडितः (जडा हुआ) |
| क्रोडः | – | अङ्कः (गोद) |
| जयतात् | – | विजयताम् (विजय हो) |

## अभ्यासः

**1. एकपदेन उत्तरत –**

क) भुवि किं जयति?

ख) मध्यप्रदेशः कीदृशः अस्ति?

ग) सिप्रा कथं प्रवहति?

घ) ग्वालियर इत्यस्य प्राचीन नाम किम् आसीत्?

ङ) सुतमिव प्रजाः कः पालयामास।

**2. एकवाक्येन उत्तरं लिखत –**

क) मध्यप्रदेशस्य सुन्दरवेशः कीदृगस्ति?

ख) नन्दनन्दनेन मध्यप्रदेशे किं कृतम्?

ग) जनः निःक्लेशः कथं भवति?

घ) मध्यप्रदेशस्य सरितः कथं मण्डिताः सन्ति?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत–**

क) पाठे आगतानां नगराणां नामानि लिखत।

ख) पाठे आगतानां कवीनां नामानि लिखत।

ग) पाठे प्रयुक्तानां नृपाणां नामानि लिखत।

घ) मध्यप्रदेशस्य परिधानं कथम् अस्ति।

ङ) कथम्भूतो मध्यप्रदेशः जयतात्।

4. **रिक्तस्थानानि पूरयत –**

क) महाकाल–परिभूषित गेहा.................प्रीता।

ख) .............श्यामल सस्यरसालैः।

ग) सुरवर–किन्नर–यक्ष.............जयतात्।

घ) .................कविवर्यैः सुललामैः।

ङ) .........परिमण्डितसरितां कलकलनादैः।

च) ...............च यस्यां सकला विद्याऽधीता।

5. **सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत–**

क) मनस्यभिमानम्

ख) भारतभूरपि

ग) नन्दनन्दनेनापि

घ) विक्रमादित्यः

ङ) जनेशः

6. **समासविग्रहं कृत्वा समासनामानि लिखत–**

क) सुन्दरवेशः

ख) नन्दनन्दनः

ग) सकलम्

घ) कविवरः

ङ) महाकालः

7 **कोष्टकस्थैः पदैः वाक्यानि रचयत –**

(विक्रमः, भारविः, भूपालः, सागरः, खनिजः, भारतभूः, विदिशा, भोजः, इन्द्रपुरी, महाकालः मध्यप्रदेशः)

8. **निर्देशानुसारं धातुरूपाणि लिखित –**

क) जप् – लट्–लोट्–लकारः

ख) क्रीड् – लृट्–लङ्–लकारः

10. मूलशब्दं विभक्तिं वचनं लिङ्गं च लिखत-

| | | मूलशब्दः | विभक्तिः | वचनम् | लिङ्गः |
|---|---|---|---|---|---|
| क) | चरणः | ---------- | ---------- | ---------- | ---------- |
| ख) | प्रजाः | ---------- | ---------- | ---------- | ---------- |
| ग) | यस्याम् | ---------- | ---------- | ---------- | ---------- |
| घ) | सुखदो | ---------- | ---------- | ---------- | ---------- |
| ङ) | परिधानम् | ---------- | ---------- | ---------- | ---------- |

## योग्यताविस्तारः -

- पाठमाधृत्य मध्यप्रदेशस्य विषये लिखत।
- भारतस्य मानचित्रे मध्यप्रदेशस्य स्थितिं निरूपयत।